M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 812

Title : Sadashiva Samhita

812

812

सदाशिव संहिता

Sadāshiva Samhitā : Title

: Author

: Editor

: Year, Vols.

: Publisher

: Remarks

812

Stotras.

॥ ६० ॥ श्रीरामाय नमः ॥ सूत उवाच ॥ भगवन्योगिनां श्रेष्ठ सर्वसत्त्वनिकेतन ॥ त्वं धा
सं १ रकारणं वामदेव देवजनार्दन ॥ १ ॥ सर्वेषां त्वं परं ज्योतिः परमात्मा प्रकृतेः परः ॥ गुणेश्व
रो गुणमयो गुणातीतो महेश्वरः ॥ २ ॥ रघुवंशयशश्चंद्रवर्द्धनो विश्वपावनः ॥ सुमित्रा
हृदयानंदचंद्रको विश्वपालकः ॥ ३ ॥ विशेषतः परं वस्तु त्वमात्मा सर्वदृक् पुमान् ॥ दाशरथ
थे महाराज राक्षसानां कुलांतक ॥ ४ ॥ रामानुज महाबाहो देवदेव रमापते ॥ सहस्रमूर्द्ध
न् विश्वात्मन् कार्यकारण तत्त्ववित् ॥ ५ ॥ अस्माकं विषयाध्मानां श्रुतीनां तान्न चेतसां ॥ १
परमात्मनि रघुश्रेष्ठे श्रीरामे परमाद्भुते ॥ ६ ॥ त्वत्तो निरासीन्महादेव तच्छांतिं कर्तुमर्हसि ॥

प्राकृते प्रलये प्राप्ते व्यक्ते ऽव्यक्ते गते पुरा ॥ ७ ॥ उदरीकृत्य संरोधाद् दूरेण निरिवात्मजान् ।
कीदृशी क्रियते सृष्टिः पाल्यते केन वा पुनः ॥ ८ ॥ कीदृशं चामरस्थानं यत्र तिष्ठति राघवः
प्रकृत्या वससंरोधः बोधश्च केन जायते ॥ ९ ॥ कुत्र कीडति विश्वात्मा जानकीप्रेमलंपटः
श्रीरामस्य परं धाम सीतास्पदनमनोहरे ॥ १० ॥ निर्गुणं निरहंकारं निर्विकारं निरंजनं ॥
निरामयं निराभासं निरवद्यं निर्लेपकं ॥ ११ ॥ सदसद्भ्यः परं वस्तु मज्योतिरमलं शिवं ॥ गु
स्यातगुणसत्तमं दिव्यं यत्र कुत्र विराजितं ॥ १२ ॥ निर्गुणं ब्रह्म तत्सर्वं नित्यस्वच्छ गुणान्वि
तं ॥ नारायणादिरूपाणि ज्ञात्वा चास्मान्निरच्युते ॥ १३ ॥ स्वगुणं ब्रह्म तत्सर्ववस्तु बुद्धिने

सदा० तेपुनः॥व्रजंतिपञ्चत्वंतेयान्तियद्रूपंपरमाद्भुतं॥१४॥तद्रूपंकथयास्माकंत्वंदेवःसर्व
२ देश्वरः॥किंरूपंकिमधिष्ठानंकिंतेजःपरमाद्भुतं॥१५॥यच्छ्रुत्वाननिवर्त्तंतेसंसारा
र्णववर्त्मनि॥श्रुत्वेतत्परमप्रीतःसुमित्रानंदवर्द्धनः॥१६॥ध्यासनमुंचन्पुनःप्राह
श्रुतिश्रेताःपुराकिल॥अस्माकंस्वामिनोभ्रातुःपादपद्मदिदृक्षया॥१७॥यस्मान्निःप्र
ष्टेतेसर्वेनागपंतन्निगमामम॥कल्पकोटिसहस्राणिकल्पकोटिशतानिच॥१८॥पंचा
गोपासनेनैवरामेतत्क्रिःप्रजायते॥अहोभाग्यअहोभाग्यमीदृशंवोमनोगतं॥१९॥अ
वश्यमेववक्तव्यंयुष्माकंहितमुत्तमं॥नमस्कृत्वाजगन्नाथंदेवदेवंरघूद्वहं॥२०॥द्वितु। २

जंश्यामलंशांतंकेवलंनवखंडनं॥यच्छ्रुत्वाप्राणिनःसर्वेनपुनर्योनिमाविशेत्॥२१॥
गुह्याद्गुह्यतमंदिव्यंगुह्यानांगुह्यमुत्तमं॥तत्सर्वंसंप्रवक्ष्यामिश्रुत्वामनसिसंधारय।
॥२२॥शठायपरिशिष्यायदात्वामृत्युमवाप्नुयात्॥इदंसत्यमिदंसत्यंसत्यमेतन्नसं
शयः॥२३॥अन्यथाप्रवक्तृत्वात्तिर्यग्योनिमवाप्नुयात्॥महर्ल्लोकंक्षितेरूर्द्ध्वमेकको
टिप्रमाणतः॥२४॥कोटिद्वयेनविष्यातंजनलोकंव्यवस्थितं॥चतुःकोटिप्रमाणंतु
तपोलोकंविराजितं॥२५॥उपरिष्टात्ततःसत्यमष्टकोटिप्रमाणतः॥आपःप्रव्याप्तकौ
मारंकोटिषोडशसंभव॥२६॥तदूर्द्ध्वपरिसंख्यानमुमालोकंस्तुतिश्चितं॥शिवलो।

सदा०
३ कं तदूर्ध्वे तु प्रकृत्याश्च समागतं ॥२७॥ विश्वस्य पुरतो वर्ती शिवस्य पुरतो बहिः ॥ एतस्मा
द्बहिरावृत्तिः सप्तावरणसंज्ञकं ॥२८॥ तदूर्ध्वे सर्वसत्वानां कार्यकारणमानिनां ॥ निर्ल
यं परमं दिव्यं महावैष्णवसंज्ञकं ॥२९॥ शुद्धस्फटिकसंकाशं नित्यस्वच्छमहोदयं ॥ निरा
मयं निराधारं निरंबुधिसमाकुलं ॥३०॥ नानासमानैः स्ववपुषा वयसा संविजृंभितं ॥
मणिस्तंभसहस्रैस्तु निर्मलं भुवनोत्तमं ॥३१॥ वज्रवैडूर्यमाणिक्यग्रथितं रत्नदीपकं
हेमप्रासादमावृत्य तत्र रवः कामजातयः ॥३२॥ रत्नकुड्यैरसंख्यातैः पुरुषैर्लयवासिभिः
स्त्रीरत्नैः परमाल्हादैः संगीतध्वनिमोदितैः ॥३३॥ स्तुतं च सेवितं रम्यं रत्नतोरणमंडि ३

तं कारुण्यरूपं तं नीरंगं गायस्माद्विनिःसृताः ॥३४॥ अनंतजोजनोच्छ्रायमनंतयोजना।
युतं ॥ यत्र शेते महाविष्णुर्भगवान्जगदीश्वरः ॥३५॥ सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः स
हस्रपात् ॥ यन्निमेषे जगत्सर्वं लयीभूतं व्यवस्थितं ॥३६॥ इंद्रकोटिसहस्राणां ब्रह्मांडा।
नां सहस्रशः ॥ उद्भवंति विनश्यंति कालज्ञानविडंबनैः ॥३७॥ यदंशेन समुद्भूता ब्रह्मावि
ष्णुमहेश्वराः ॥ कार्यकारणसंपन्ना गुणत्रयविनावकाः ॥३८॥ यतश्चावर्त्तते विश्वं यत्रैव
च प्रलीयते ॥ तदूर्ध्वेदाः परमं धाम मदीयं पूर्वसूचितं ॥३९॥ एतद्गुह्यं समाख्यातं ददातु वा।
छितेहिन ॥ तदूर्ध्वे तु परं दिव्यं सत्यमन्यद्व्यवस्थितं ॥४०॥ न्यासिनां योगिनां स्थानं तगव

सदा० द्रावनोत्तमनां ॥ महाविष्णुर्महादेवस्तत्र सर्वशक्तिसमन्वितः ॥ ४१ ॥ तदूर्द्ध्वं तु परं शांतं महावै
६ कुंठसंज्ञकं ॥ वासुदेवादयस्तत्र विहरंति स्वमायया ॥ ४२ ॥ तदूर्द्ध्वं तु स्वयं सांतं गोलोकं
प्रकृतेः परं ॥ वाङ्मनोगोचरातीतं ज्योतिरूपं सनातनं ॥ ४३ ॥ नित्यं गुणमहोत्साहं नि
त्योत्सवगुणान्वितं ॥ सौभाग्यनिलयं कांतमानंदकरमंदिरं ॥ ४४ ॥ नित्यानंदमयं रम्यं
गुणोत्पत्तिमहोदयं ॥ सर्वर्त्तुरससंयुक्तं प्रमादागणशेवितं ॥ ४५ ॥ पुण्यद्विपसमाजुष्टं
जुष्टं च परमर्षिभिः ॥ सरितां जलकल्लोलं विलोलं नलिनीकुलं ॥ ४६ ॥ तुलसीपुष्पसौ
भाग्यं नित्यं नववनमोदितं ॥ वासंतीचंपकाशोकपारिजातमहोदितं ॥ ४७ ॥ मालतीयूथि ६

कांतोजकुंदमंदारसेवितं ॥ केतकिमल्लिकोल्लासकदंबघनमंडितं ॥ ४८ ॥ दिव्यरत्नसमा
कीर्णं हरिवंशसुरक्षकं ॥ इदं वेदापरं रम्यं संदद्याद्वांछितं हि नं ॥ ४९ ॥ यत्रास्ते च स्वयं
जो पुण्यासरयूर्विरांबुना ॥ सुरभिः सुगणा यत्र वृंदादेवी मनोहरा ॥ ५० ॥ यत्र संतानकं नाव
नं दिव्यं हरेः प्रियं ॥ तत्रैव देव्या वृंदाया वनं कामदुघे द्रुमैः ॥ ५१ ॥ तयोर्मध्ये पुरं दिव्यं सां
केतं नाम संज्ञितं ॥ येषिद्रत्नमणिस्वच्छं प्रासाद गुणसेवितं ॥ ५२ ॥ दिव्यचामरसंयुक्तं मुक्ता
दामविलंबितं ॥ चंद्रातपघनच्छायं हेमकुंभपुरस्कृतं ॥ ५३ ॥ पताकातोरणै रम्यं सुधासा
रघनाचलं ॥ विंकटादिचित्रकूटगोवर्द्धनगिरित्रयं ॥ ५४ ॥ चामरश्याद्द्रिरणीपुण्या प्रम

सदा० दायुतनाकंपरिखादुर्गसंकीर्णमणिवज्रकपाटिकं ॥ ५५ ॥ दशकक्षासमापन्नंप्रतिकक्षक
५ परिरक्षकं ॥ चतुर्द्वारपरासक्तंवह्निविद्युत्सुररश्मिकं ॥ ५६ ॥ पूर्वप्राचीदक्षोत्तरद्वारोपेताः
सुररक्षकाः ॥ अथामतुल्यबलोपेताःसर्वैश्वर्यगुणान्विताः ॥ ५७ ॥ महाबलामहोत्साहारा
मध्यानपरायणाः ॥ रामभक्तिनिरतानिवृत्ताशेषवृत्तयः ॥ ५८ ॥ दिव्यांबरधराःसौम्या
दिव्याभरणभूषिताः ॥ दिव्यगंधानुलिप्तांगादिव्यमाल्यविभूषिताः ॥ ५९ ॥ यज्ञसूत्रगु
णोपेताल्लसन्मौलिकिरीटिनः ॥ सिंहासनेसमासीनाल्ललनायुतसेविताः ॥ ६० ॥ गदेषु
चापशैलाग्रतरुहस्ताव्यवस्थिताः ॥ सुग्रीवांगदवीरौचविभीषणानिलात्मजौ ॥ ६१ ॥ ५

पश्चिमांपातिधर्मात्माराक्षसेंद्रोहरिप्रियः ॥ पूर्वमावृत्यविश्वात्मासुग्रीवस्तेजसात्मकः ॥
॥ ६२ ॥ उत्तरंरक्षतिवीरोवालिपुत्रोममप्रियः ॥ दक्षिणंतुसदापातिहनुमान्नामवत्सलः ॥
॥ ६३ ॥ सर्वसत्वगुणोपेतःसर्वसत्वनिकेतनः ॥ महासत्वःस्वयंसोपिकपिरूपोदुरासदः ॥ ६४ ॥
सीतादत्तमहाहारशोभितोरुमहाभुजः ॥ श्रीरामपार्श्वदैर्नित्यैर्हरिराक्षसयूथपैः ६५ ॥ रक्षि
तंपुरतःसम्यक्शालतालशिलायुधैः ॥ वलश्चप्रवलश्चैवनंदकश्चोपनंदकः ॥ ६६ ॥ चंडो
विरःप्रचंडश्चनंदकश्चसुनंदकः ॥ भद्रश्चापिसुभद्रश्चद्वारोपेताःसुरेश्वराः ॥ ६७ ॥ चतुरङ्गु
जास्सायुधाश्चसर्वाभरणभूषिताः ॥ एतैरपिवृतंमध्येदेवानांकपियूथपैः ॥ ६८ ॥ नलकुमु

सदा० दनीलाद्यास्तुल्यवेषाः किशोरकाः ॥ निर्विकारा महोदाराधिरोदांतगुणोत्तराः ॥ ६९ ॥ गद्दांहस्ताः
६ कामरूपारामावयवसंभवा ॥ महासत्वास्तुल्यरूपा राममन्त्रकारहस्करा: ॥ ७० ॥ अंतरंगाः प्रिय
तमाश्रंगावरणपालकाः ॥ गायंति सुस्वरं प्रीत्यानृत्यंति मधुरस्वाराः ॥ ७१ ॥ जयश्च विज
यश्चैव वरायुधधरावुभौ ॥ देवानां प्रवरौ नित्यौ सप्तमपि सुनिष्ठितौ ॥ ७२ ॥ तद्वनस्यांतरे
वेदाग्नि नागसमेषले ॥ सर्वतः कांचनीभूमिर्दिव्योद्यानसमुद्यमे ॥ ७३ ॥ वर्हालिकोकिल
स्वष्टनादिते शुककूजिते ॥ वृंदागुल्मघनच्छाये कुंजपुंजमधुस्रवे ॥ ७४ ॥ चिंतामणिमहा
पीठे सर्वसत्वनिकेतने ॥ तन्मध्ये परमोदारः कल्पवृक्षो वरप्रदः ॥ ७५ ॥ वज्रांगयष्टिकः श्री ६

मान्करुणांकुरमूलकः ॥ षट्प्रेमरसश्रावीवांछीत्वचि समावृत्ता ॥ ७६ ॥ दानस्वभावः स
ततं स्थितिमौनं गतिर्यय: ॥ इंद्रनीलमणिप्रख्यो नित्यस्वच्छसुपुत्रकः ॥ ७७ ॥ धर्मार्थकाम
पुष्पालिस्कंदशाखसमुच्छ्रितः ॥ प्रवालमंजरीरम्यमानेदपुष्पसंचयः ॥ ७८ ॥ चिंतामणिफ
लोसत्रिः करोतु वांछितं हितः ॥ तस्याधः परमं दिव्यं रत्नमंडपभूषितं ॥ ७९ ॥ तन्मध्ये वे
दिका रम्या स्वर्णरत्नविभूषिता ॥ तन्मध्ये च परं शुभ्रं रत्नसिंहासनं श्रुतं ॥ ८० ॥ सहस्रारं महा
पद्मं कर्णिकारमनुत्तमं ॥ तन्मध्ये मुद्रीकाभिन्नं मडाढीपविलिन्नकं ॥ ८१ ॥ वह्निंदुमंडलेना
पिवेष्टितं विंदुभूषितं ॥ चंद्रकोटिप्रतिकाशं छत्रकं च सचामरं ॥ ८२ ॥ सदामृतघनश्रावी

सदा० मुक्तादामवितानकं ॥ तन्मध्ये जानकी देवी सर्वशक्तिसमन्विता ॥ ८३ ॥ यत्रास्ते भगवान्रामः सर्वदे
वशिरोमणिः ॥ तत्रादौ चिंतयेत्तेजो वह्निरूपं सशक्तिकं ॥ ८४ ॥ तेजसा महता श्लिष्टमानंदैका
७ ग्रमंदिरं ॥ एकाग्रमनसा पश्येत्तत्र देवं सुविग्रहं ॥ ८५ ॥ स्निग्धमिंदीवरश्यामं कोटींदुललि
तद्युतिं ॥ चिद्रूपं परमोदारं वीरं तद्दूरघूद्वहं ॥ ८६ ॥ द्विभुजं मधुरं शांतं जानकीप्रेमविह्वलं
दोर्दंडचंडकोदंडशरचंडमहाभुजे ॥ ८७ ॥ सीतालिंगितवामांगं कामरूपं रसोत्सुकं ॥ अरु
णांकुरसंकाशं विकचांबुजपादकं ॥ ८८ ॥ पदद्वंद्वनखचंद्रप्रियतेजसतावृतं ॥ कूर्मपृष्ठस
दाभासं रणन्मंजीरपादकं ॥ ८९ ॥ कटिसूत्रांकितेभाशं यत्तसूत्रैरलंकृतं ॥ रत्नकंकणके ७

यूरशोभिताग्रभुजद्वयं ॥ ९० ॥ चंद्रकोटिप्रतिभासं कौस्तुभेन विराजितं ॥ दिव्यरत्नसमायुक्तं
मुद्रिकाभिरलंकृतं ॥ ९१ ॥ नानाशोभासमायुक्तं मुक्ताफलस्फुरन्मुखं ॥ सूर्यकोटिप्रती
काशं कुंडलाढ्यश्रुतिद्वयं ॥ ९२ ॥ प्रद्युतारुणसंकाशं किरीटेन विराजितं ॥ गोविंदं गो
विंदाश्रेष्ठं चिन्मयानंदविग्रहं ॥ ९३ ॥ दिव्यायुधसुसंपन्नं दिव्याभरणभूषितं ॥ अनंतरं
केवलं ब्रह्मपातकौशेयवाससं ॥ ९४ ॥ शंखचक्रगदापद्मचर्मासिहलमूसलैः ॥ तद्रूपैर्वि
विधाकारैः सेव्यमानं परात्परं ॥ ९५ ॥ भानुकोटिप्रतिकाशं चंद्रकोटिप्रमोदकं ॥ इंद्रको
टिसदामोदं वसुकोटिवसुप्रदं ॥ ९६ ॥ विष्णुकोटिप्रतिकाशं ब्रह्मकोटिविसर्जनं ॥ रुद्रको

सदा० टिप्रमथनंमातृकोटिविनाशनं ॥ ९७ ॥ भैरवःकोटिसंहारंमृत्युकोटिविवत्सकं ॥ यमकोटिदु
८ राधर्षंकालकोटिप्रधावकं ॥ ९८ ॥ गंधर्वकोटिसंगीतगणकोटिगणेश्वरं ॥ कामकोटिक
लानाथंदुर्गाकोटिविमोहनं ॥ ९९ ॥ सर्वसौभाग्यनिलयंसर्वानंदैकदायकं ॥ कौशल्यानंदनं
रामंकेवलंनवषंडनं ॥ १०० ॥ विश्वावसुचित्रकेतूचित्रसेनाद्युलुककौ ॥ तुंबरेर्नारदाद्यैश्च
पी सुकैःसुकंठकैः ॥ १ ॥ गीयमानंपरंतत्वंश्रुतिजातिविशारदैः ॥ ध्यानंतोशसमुद्भूतंमुनीनांचस्वरू
पिणं ॥ २ ॥ संगीयमानंविनयावाल्मीकिनांतरात्मना ॥ मत्स्यकूर्मवराहाद्यैर्नृसिंहहरि
वामनैः ॥ ३ ॥ भार्गवंहलिकंसारिबुधकल्किविमिश्रितैः ॥ उपास्यमानंदेवेशंदेवानांप ८

वृरंविंतुं ॥ ४ ॥ तत्रवागीश्वरीदेवीमाधवीप्रियवल्लभा ॥ असिताचसिताचैवप्रकृति
गुणसंभवा ॥ ५ ॥ उमादेवीमहामायाश्रुतिजातिविसारदा ॥ पद्महस्ताविशालाक्षीक
मलाहरिवल्लभा ॥ ६ ॥ सुरभीप्रेमसानित्यावृंदादेवीमनोरमा ॥ चिदात्मकंसदानासंन
यनानंददायकं ॥ ७ ॥ सुकांतंहृदयारामंरामंराजीवलोचनं ॥ निर्विकाराःपृथुश्रोणयोरा
घवंपर्युपासते ॥ ८ ॥ उरवशीमेनकारंभाराधाचंद्रावलीस्तथा ॥ हेमाक्षेमावरारोहापद्म
गंधासुलोचना ॥ ९ ॥ हंसिनीमालिनीपद्माहरिणीमृगलोचना ॥ कर्पूरांगीविशालाक्षी
शक्तिप्रियारसोत्सवा ॥ १० ॥ चारुनेत्राचारुगात्रासर्वांगीचारुलोचना ॥ रामायैपरिन्त्ये

सदा० ५

तेगीतवादित्रमोहिताः ॥ २१ ॥ गोपकन्यासहस्रैस्तु गोपबालैश्च तादृशैः ॥ गोकुलैरावृतंसम्य
क्पञ्चसंख्यादिभिस्तथा ॥ २२ ॥ अथावरणं अंगादिपरिसंकीर्णमात्मादिशक्तिरंजितं ॥ वे
ष्टितं वासुदेवाद्यैः सेवितं हनुमदाद्यैः ॥ २३ ॥ नयानयकलावेशध्वष्टादिभिः सुमंत्रितः ॥ वसि
ष्ठवामदेवादिज्ञानानंदविनोदकं ॥ १४ ॥ अंगोत्पत्तिकलावेसनीलादिबलमोदकं ॥ अ
शादंशसमुत्पत्तिध्रुवादिपरिवेष्टितं ॥ २५ ॥ इंद्रादिदेशदिक्पालैर्वेष्टितं नततकंधरैः ॥ व
ज्राद्यामायुधैर्दिव्यैः पूजितं करपाल्लितं ॥ २६ तासां मध्ये वरारोहा तप्तकांचनसंनिभा ॥
विद्युच्चैलांचलो नापि वीजयंती पतिंमुदा ॥ २७ ॥ वामांगाश्लिष्टदिव्यांगी यस्तस्त्रैय विधामि ५

नी ॥ प्रेमानंदसुखोत्पत्तिस्थिद्रूपा परमाकुला ॥ २८ ॥ त्रिपादिमात्रात्मिकानंदा सर्वैश्वर्यरसोत्स
वा ॥ अर्द्धमात्रात्मिका नित्या चोंकाराक्षरसंभवा ॥ २९ ॥ सर्वशक्तिमयी रम्या शक्तीनां श
क्तिदायिनी ॥ यन्नना सर्वजन्तूनां योगीनामपि मोहिनी ॥ २० ॥ स्वयमात्मद्विधाभूत्वा प
रमानंदरूपिणी ॥ परमानंदसंदोहा ज्ञानानंदसुविग्रहा ॥ २१ ॥ सासीत्ता भगवती ज्ञेया
राघवांसविनिःसृता ॥ तयादेव्या परं वेदाः काले काले प्रसूयते ॥ २२ ॥ ब्रह्मा विष्णुश्च रु
द्रश्च देवेंद्रो ऋषयस्तथा ॥ नवकालेन्तरणां सेव राजसा शक्तिरूपिका ॥ २३ ॥ जगती पालने
शक्तिर्लक्ष्मीरूपा नवत्युत ॥ संहारे समनुप्राप्ते नामशी सक्तिरुत्तमा ॥ २४ ॥ विश्वगर्भा

सदा०
१०

विगर्त्तो वै मूलप्रकृतिसंज्ञका ॥ यस्याः कटाक्षमात्रेण ब्रह्मांडानां सहस्रशः ॥ २५ ॥ आविर्भाव।
स्तिरोधानं किंपुनः सृष्टिरेकधा ॥ कृत्यर्थे राघवस्याथ परमस्य च विभूमनः ॥ २६ ॥ प्रतिलो
म्नि च ब्रह्मांड श्रावयंती मुहुर्मुहुः ॥ सा तु देवी पराणीत्वा सोऽथ रामः परो हरिः ॥ २७ ॥ यतो
रैक्यं विजानीयात्तत्कारयकारणकारणात् ॥ तयोर्भावसमापन्नः कुमारः समपद्यतः
॥ २८ ॥ शृंगाराख्यः सुकुमारः सर्वलोकैकमोहनः ॥ येन विज्ञंनितं विश्वं येन सर्वमिदं तत
तं ॥ २९ ॥ येन वशीकृता नाना यस्मिन्सर्वं प्रलीयते ॥ गोविंद इति विख्यातो रामः सीता
विज्ञंनितः ॥ ३० ॥ साकेतपश्चिमद्वारात् वृंदावनमदूरतः ॥ गोगणै राघवतः श्रीमान्वृक्ष १०

र्णद्वेरणुविनोदकृत् ॥ ३१ ॥ सर्वरासरसोत्पन्नो गोपकन्यासमावृतः ॥ गोवर्द्धनगिरिस्त
त्र यत्र देवप्रतिष्ठितः ॥ ३२ ॥ एतत्तु गुह्यं परं वेदा सुष्माकं हितकाम्यया ॥ कथितं सानु।
पूर्व्येण राघवस्य परं महः ॥ ३३ ॥ एतत्स्फुंत्वां परं धाम मनसा राघवे स्थितं ॥ उद्धरेत्सप्त
गोत्राणामेकोत्तरशतं कुलं ॥ ३४ ॥ यत्र कुत्र मृतो वापि तिष्ठन्नश्नन्स्वपन्नपि ॥ गोलोके
नियतं वासः सत्यं सत्यं वदाम्यहं ॥ ३५ ॥ देवैरपि दुराधर्षं किमुतान्यगणैरपि ॥ अश्वमेधास
हस्राणि वाजपेयशतानि च ॥ ३६ ॥ अटनं सर्वतीर्थेषु प्रदानं सर्वसंपदां ॥ एतत्तु ध्यानयोग
स्य कलां नार्हति षोडशीं ॥ ३७ ॥ ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥ स्वर्णस्तेयपीसु

स०१० रापाणि गुरुतल्पायुतानि च ॥ ३८ ॥ कोटिकोटिसहस्राणि ह्युपपापानि यान्यपि ॥ सर्वाण्य
पि प्रणश्यन्ति रामधामविसूचनात् ॥ ३९ ॥ इति श्रीसदाशिवसंहितायां निरुक्तलक्षणायां
११ रामानुजवेदसंवादे गोलोकवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ सूत उवाच ॥ श्रुतमस्माभि
रीशानरहस्यं परमाद्भुतं ॥ इदं विश्वं कथं जातं सौमित्रे वद तत्त्वतः ॥ १ ॥ सौमित्रिरुवाच
शृणुध्वं श्रुतयः सर्वा रहस्यं सृष्टिसंभवं ॥ यथा ह्युपरि संभूतं तस्मिन्नेव प्रलीयते ॥ २ ॥
सृष्टेरग्रे परं धाम्नि संवादः किमभूत्किल ॥ महाशंभुर्महाविष्णुर्महामायेरितः पुरः ॥ ३ ॥
महाशंभुर्महामाया महाविष्णुश्च सक्रियः ॥ कालेन तु समनुप्राप्ते राघवं परिचिंतयन् ॥ ४ ॥ ११

महाविष्णुरुवाच ॥ कस्मादाविरहं नाथ केन वा जनिरुत्तमा ॥ किं मूलं किमधिष्ठानं कुत
एव समागतः ॥ ५ ॥ कथं मूलं विजानामि तव देव प्रसादतः ॥ एतत्ते श्रोतुमिच्छामि प्रसादं
कुरु मे प्रभो ॥ ६ ॥ महाशंभुरुवाच ॥ अखंडब्रह्मणो नित्याद्राघवात्तन्नित्यविग्रहात्त
चिदात्मकात्परानंदात्साकेतनगराधिपात् ॥ ७ ॥ मिथुनं पुरा प्रजातं सीतागविमोक्षणा
त् ॥ एकं वस्तु यथा धीरैर्नानात्वेनोपलक्ष्यते ॥ ८ ॥ तथैकं परमं ब्रह्म नित्यलीलासुविग्रहे ॥ य
द्वैतं सर्वतत्त्वेषु स्त्रीपुरुषव्यवस्थिति ॥ ९ ॥ महाविष्णुरुवाच ॥ कथमेतद्विजानामि मिथुनं ब्रह्म
संभवं ॥ सीता कापि परा नित्या रामः को वा सदात्मदृक् ॥ १० ॥ त्वं देवः परमं ज्योतिर्मातेयं

सदा० परमागतिः॥ युवाभ्यांपरतोनित्यौकौतौदेवौसुरेश्वरौ ॥ ११ ॥ संशयोमेमहांस्तातहृदयेप
१२ रिवर्त्तते ॥ अनुग्राह्यास्त्वयाशंभोपुत्रोहंयदितत्त्वत ॥ १२ ॥ महाशंभुरुवाच ॥ शृणुता
तप्रवक्ष्यामिरामस्याद्भुतकर्मणः ॥ सीतयाश्चपरंदेव्यालीलामात्रंखिलंजगत् ॥ १३ ॥ अ
तिउग्रेसतोध्याभिन्नसतोवाक्वह्निरूपिका ॥ कालानिलसमारूढावर्गपंचांतभूषिता ॥ १४ ॥
इंद्रनीलमणिस्निग्धरुचिराकृतिरव्ययः ॥ द्विभुजावयवोदक्षः शरकोदंडमंडितः ॥ १५ ॥
श्रीरामोविग्रहवान्परंब्रह्माभिधीयते ॥ भुक्तिमुक्तिप्रदानार्थंसाधकानांपुनःपुनः ॥ १६ ॥ १२
आनंदवाचकःशब्दविभूतिसंप्रयोजितः ॥ अंतेविष्णुविजानीयात्प्रकृतेर्वेशमागतं ॥ १७ ॥

एवंतेयापरंनित्यासीताब्रह्मसुविग्रहा ॥ अनुग्रहार्थमस्माकमेकंब्रह्मद्विधाकृतं ॥ १८ ॥
आनंदावयवोनित्यानित्यालीलासुविग्रहा ॥ सर्वशक्तिमयीधात्रीसर्वसक्तिमयीतथा ॥ १९ ॥
प्रेमानित्यसुखात्यक्तिर्नित्यरूपाचिदात्मिका ॥ ज्ञानमभिज्ञानभूताज्ञानदाज्ञप्तिमात्रि
का ॥ २० ॥ अर्द्धमात्रात्मिकाशश्वत्बिंदुनादस्वरूपिणी ॥ ब्रह्मोत्पत्तिरसावेशाब्रह्मैकप
दमव्यये ॥ २२ ॥ निःकलापिकलाधीशानिर्गुणापिगुणात्मिका ॥ नित्योत्सवापरास्निग्धारा
मावयवसंभवा ॥ २२ ॥ लीलार्थंहिविभोर्नित्यंराघवस्यविहारिणः ॥ आविर्भावंतिरोभा
वंकरोतिगुणसंगतः ॥ २३ ॥ विश्वोत्पत्तिर्गुणात्मासाजगदानंदकारिणी ॥ श्रीरामसं

सदा० निधिवशात्करोति विकरोति च ॥ २४ ॥ इंद्रकोटिसहस्राणि ब्रह्मांडानां शतानि वै ॥ लीला
१३ मात्रं जगद्धात्री सीता या त्वं निबोध मे ॥ २५ ॥ अहं तथा महादेव्यास्संप्रसूतो नया सह ॥ आद्या
सृष्टिरिति ख्याता जनकोऽसि त्वं सुव्रत ॥ २६ ॥ आवाभ्यां त्वं महाबाहो सर्वदेवेश्वरेश्वरः ॥ आ
विर्भूतो गुणावासः सर्वकारणकारणं ॥ २७ ॥ एषा देवी महामाया सीतादेहसमुद्भवा ॥ प्र
कृतिर्गुणसंपन्ना योनिरूपा प्रकीर्तिता ॥ २८ ॥ एषोऽहं परमं ज्योतिस्तल्लिंगं भगवान् शिवः ॥
आद्यो जातो महाबाहो कालेन सह मायया ॥ २९ ॥ योनिलिंगात्मकं विश्वं रामवीर्ये प्रतिष्ठितं ॥
रामबीजसमुद्भूतं वन्हिव्योमात्मकं जगत् ॥ ३० ॥ यथागस्सूक्ष्मवीर्यस्य प्राकृतस्त्वं महाद्रुमः ॥ १३

तथैव रामवीर्यस्थं जगदेतच्चराचरं ॥ ३१ ॥ योनिरूपा महामाया तल्लिंगो भगवान् स्वयं
उभयोरपि तुल्यार्थदर्शिनस्त्वं महानघ ॥ ३२ ॥ सीतारूपा महामाया रामरूपोऽस्म्यहं वि
भो ॥ आज्ञया तस्य देवस्य करोमि विकरोमि च ॥ ३३ ॥ मिथुनं यत्त्वया पृष्टमधिष्ठानं
समूलकं ॥ एतत्सर्वं मयाख्यातं गुह्याद्गुह्यतमं महत् ॥ ३४ ॥ महाविष्णुरुवाच ॥
धन्यस्त्वं कृतकृत्यस्त्वं जितात्मासि महेश्वर ॥ वाङ्मनोगोचरातीतोऽयं तत्त्वं स्वप्रकटी
कृतं ॥ ३५ ॥ इदानीं लब्धसंज्ञोऽस्मि मूलतत्त्वविशोधनात् ॥ ज्ञानैश्वर्यबलोत्साहैराम
शक्त्योपबृंहितः ॥ ३६ ॥ कृपाकृता त्वया तात रामधाम निरूपितं ॥ सीतया च तथा

म०दा० देव्याः कीर्त्तये तत्सुनिश्चितं ॥ ३७ ॥ पृच्छामि त्वां महादेव कथ्यतां यदि रोचते ॥ संशयो मे
१६ महानासीत् तच्छांतिं कर्त्तुमर्हसि ॥ ३८ ॥ कस्मिन्नधाम्नि च विभ्राजत्मा सीतया सह राघ
वः ॥ दिविक्रीडारतो देवः सर्वशक्तिविनोदकृत् ॥ ३९ ॥ के देवा मुनयस्तत्र के संनि
पार्श्ववर्त्तिनः ॥ द्वारपालाश्च भोगाश्च किंरूपेण व्यवस्थिता ॥ ४० ॥ का देव्यपरमा दि
व्यायानिः सर्वं नृपात्मजाः ॥ आत्मसात् कुर्वते प्रेम्णा रमयंति रघूद्वहं ॥ ४१ ॥ महाशं
नुरुवाच ॥ शृणु त्वं देवदेवेश प्रभावं पदमव्ययं ॥ रहस्यं रामदेवस्य सीतायाश्च विशेषतः
४२ ॥ आद्यं तु वैष्णवं धाम नावगम्यं सनातनं ॥ भक्तिमुक्तिप्रदानार्थं कथयामि रिवला १६

त्मकं ॥ ४३ ॥ यत्रश्रुत्वा न प्रवर्त्तंते जंतवो विषयार्णवे ॥ अंत्यश्चित्त्यां वदिर्युक्ता निर्वाण
कर्मसु ॥ ४४ ॥ आवरणाद्यस्य विज्ञेयः कूटस्थो रघुनंदनः ॥ निर्विकारी वीनाचारी मायशक्त
विनोदकृत् ॥ ४५ ॥ अनिर्भिन्नगभीरत्वान्निर्गुणो गुणसंसदि ॥ नित्यालीलागुणारामो वि
रामः परमापदो ॥ ४६ ॥ सर्वदृक् सर्ववेत्ता च कर्त्ता हर्त्ता रघूद्वहः ॥ जानकीहृदयानंदमहोल्ला
सविनोदकः ॥ ४७ ॥ यत्रास्ते भगवान्देवो नित्यरूपो जनार्दनः ॥ तद्धाम परमं दिव्यमखंड
प्रकृतेः परः ॥ ४८ ॥ योजनांशतार्द्धैश्च परे धाम्नि शिवास्पदे ॥ महाविष्णुशिवस्थाने वैकुंठ
भुवनाद्गे ॥ ४९ ॥ केवलेद्वैतरहिते मायातीते गुणोज्झिते ॥ गोलोके तत्र संचारे प्रेमोत्स

स॰दा॰ वरसोद्भवे ॥५०॥ गुणोत्साहरसामोदे सर्वदेवनमस्कृते ॥ सर्वमधुरासंपन्ने सर्वभावसम
१५ न्विते ॥५१॥ ऋषिसंघसुगनीकैर्नित्यरूपपरिच्छदैः ॥ रूयानेकबलोत्साहैर्देवतुल्यपरा
क्रमैः ॥५२॥ रूपदक्षश्रेष्टकपिश्रेष्ठैः त्वराद्यसपन्नगैः ॥ पार्षदैरस्त्रसंपन्नैर्वीरधीरै
रणोत्कटैः ॥५३॥ सीतासितस्वरूपांगैः स्वरास्येरतिविचित्रमैः ॥ नदद्गुणैः रूपसंपन्नैर्दिव्या
नरगणभूषितैः ॥५४॥ ललनायुतसंवादे रामांघ्रिजजनोत्स्यितैः ॥ अन्योन्यनिक्तिसंवादे
निरूपकरुणान्वितैः ॥५५॥ अवतारैरसंख्यातैः प्रधानैर्दशभिस्तथा ॥ वेदैः सांगोपनिष
दैर्यज्ञैर्दुर्दुविधैरपि ॥५६॥ सेव्यमानेपरेरम्येगुणावासेपरंपदे सर्वदागुणसंवादे १५

षड्वर्गरिपुवर्जिते ॥५७॥ आनंदस्वरूपेनित्येपरेपारेगुणान्विते ॥ सरयूजलकल्लोल।
विमर्दिकृतमन्मथे ॥५८॥ तस्याश्चांतः पुरेदिव्ये सांकेतभुवनोत्तमे ॥ जानकीपदशोचा
रेविहाररतिचित्तमे ॥५९॥ तुलसीकुंदमंदारचंपकाशोकमल्लिके ॥ वापीकूपतडा
गादिप्रफुल्लकमलोत्तमे ॥६०॥ अखंडब्रह्मसंदोहस्वरूपानंदविग्रहे ॥ सीतांगपरिसं
भूतानेकशक्तिमनोहरे ॥६१॥ सीतांघ्रिकमलस्पर्शजातांबुजसहस्रके ॥ सुरद्रुमल
तागुल्मछायारसप्रमोदके ॥६२॥ संतानकमहारण्यमंदारारण्यसुमंडिते ॥ स्वप्रकाश
रत्नग्राम सुखवृत्तमहोत्सवे ॥६३॥ कल्पवृक्षतरुच्छायेसर्वाधारसमन्विते ॥ चिंताम

सदा० णिमहायोगिरत्नमंडपमध्यगे ॥ ६४ ॥ तन्मध्येवेदिकारम्यातत्रदिव्यावरासनं ॥ तत्रसिं
१६ हासनेदिव्येहेमांबुजदलाष्टके ॥ ६५ ॥ तदुत्तिकर्णिकामध्येमुद्रात्रयविभिन्नके ॥ तत्र
देवंसमासीनंसीतयासहराघवं ॥ ६६ ॥ अखंडब्रह्मनिर्वाणछित्तुजःखरसूदनः ॥ को
दंडचंडदोर्दंडशरग्रामविभूषितः ॥ ६७ ॥ दिव्यायुधसुसंपन्नोदिव्याभरणभूषितः ॥ अ २
दृश्यःसर्वतत्वानांबुध्यादिनांगुणार्थिनां ॥ ६८ ॥ तेजःपुंजसदानासंषंडिताज्ञानपालकः
अनंतगुणगंभीरोधीरोदात्तगुणोत्तरः ॥ ६९ ॥ आनंदगुणविज्ञेयोनित्यानंदःस्वरूपदृ
क् ॥ चैतन्यगुणमाहात्म्यःसदोदृक्कमनोरथः ॥ ७० ॥ आत्मदृक्गुणसंपन्नोबुध्यादिभिर्वि १६

लक्षितः ॥ दृश्यादृश्यगुणातीतोदृष्टासगुणाकर्मणां ॥ ७१ ॥ एवंहिभगवान्वीरःपुरु
षःसदसत्परः ॥ दिव्यशक्तिगुणाविष्टःसीतयासहराघवः ॥ ७२ ॥ परव्योम्निसदाना।
सेदिव्यत्तिस्मपुनःपुनः ॥ सच्चित्लीलावपुःश्रीमान्सर्वानंदैकमंदिरः ॥ ७३ ॥ एकंविहर
तस्तस्यश्रीरामस्यात्मतेजसः ॥ अहंजातानयासार्द्धंसीतयाविश्वकारणात् ॥ ७४ ॥ क
लेनाप्यवितर्केणप्रमेबाहुतविक्रमः ॥ सच्चिद्रूपीखिलव्यापीगुणातुक्तगुणाद्दक्वितुः ॥
७५ ॥ महोत्साहोमहावीरोमहाविर्योमहाबलः ॥ तेजस्वभावदुर्द्धर्षगुणानामिश्वरप्रभो
॥ ७६ ॥ सर्वाधारसमर्थोहंसर्वकारणभावनः ॥ तत्वोत्पत्तिर्गुणावासोनिराशागुणकर्मसु ॥ ७७

सदा० मायाविनोदसक्तांगो मायोदधिरनंतकः ॥ मायारंगविनिर्भिन्नात्मा मायोदधिविलंघनः
१७ ७८ ॥ नित्यस्वस्थाप्रतीकाशः कालात्मा कालरुद्विभुः ॥ धारः कलयतां कालः कालधर्म
विवर्जितः ॥ ७९ ॥ कालैश्वर्यगुणारंभो विरामइतरेषु वै ॥ विश्वहेतोरधिष्ठाता विश्वतनु
रुविश्वदृक्शुचिः ॥ ८० ॥ इयंशक्तिस्तथाजाता जननीतवसुव्रत ॥ विश्वयोनिरधिष्ठात्री
विश्वधात्र्यखिलेश्वरी ॥ ८१ ॥ मोहनी सर्वसत्वानां जननी सर्वसंपदां ॥ विश्वोत्पत्तिस्थितिल
याभासरूपत्रयविधारिणि ॥ ८२ ॥ कालरात्रिर्महारात्रिर्महामारस्वरूपिणी ॥ ईश्वरास
वेन्द्रतानां मोहनी योगिनामपि ॥ ८३ ॥ नक्तानांहि स्वरूपांगी विरूपांगी च दुःकृतां ॥ नित्य १७

रूपाविनर्कैयंहेतुवादगुणादिषु ॥ ८४ ॥ चिरकालपरानीशध्यानयोगादिभिः परैः ॥ ध्येया
ष्प्रिकमलानित्यायोगिवृंदैरहर्निशं ॥ ८५ ॥ चिदात्मिका सदानंदा ब्रह्मानंदैकविग्रहा ॥ ज्ञा
नमयीकलावेशचिच्छक्तिर्विश्वधारिणी ॥ ८६ ॥ मायोद्दृक्रूपरानंदरससरूपा गुणात्मिका
ज्ञानानंदगुणाभासा चिद्रूपावर्णरूपिका ॥ ८७ ॥ निर्विकारा निरुत्साहा गुणतत्वविभा
विनी ॥ निरालंबा निराधारा कूटस्था विश्वभाविनी ॥ ८८ ॥ ऋग्यजुःसामवेदानामु
च्चारध्वनिरूपिका ॥ वेदार्थप्रथिनाभ्यावाकव्यासाहव्यरूपिणी ॥ ८९ ॥ योगिनां मान
सौनोजस्सूक्ष्मरूपापराजिता ॥ योगमुद्रा महामाया कालवेगप्रहारणी ॥ ९० ॥ अस्यां जा

स.रा.० तोसि देवेशमनःपरतरो महान् ॥ सर्वैश्वर्यगुणाधीशः कालयानविनोदकृत् ॥ ९१ ॥ आ
१८ त्मनिष्ठापराकाष्ठानिष्ठा शांतिः प्रकाशवान् ॥ नानातत्वलशद्देहः प्रकृतिर्निर्गुणवान्वि
भुः ॥ ९२ ॥ भगवान्पुरुषः साक्षी आत्मानंदैकविग्रहः ॥ निराश्रयो गुणग्रामप्रकृतिर्गुणहृ
दृक्शुचिः ॥ ९३ ॥ आत्मा स्फूर्त्तिः सदानंदनिरस्तप्रकृतिर्मतः ॥ नानातत्वविहारोसि प्रकृति
र्निलयो महान् ॥ ९४ ॥ सदानंदः सदाभासः सदानंदः सनातनः ॥ सर्वशक्तिमनोहारी सर्व
शक्तिविनोदकृत् ॥ ९५ ॥ कारणार्णवशायी च सर्वाधारवरासनः ॥ सहस्रमूर्द्धा विश्वा
त्मा सहस्राक्षः सहस्रपात् ॥ ९६ ॥ महाविष्णुर्महातेजाः स्वप्रकाशो गुणात्मवान् ॥ विधानि १८

धिर्महाशृंगरूपापांगविमोक्षणः ॥ ९७ ॥ रूपामयो महाबाहो महादेवो महेश्वरः ॥ ल
क्ष्मीवान्गुणसंपन्नाः सर्वाश्चर्यैकमंदिरः ॥ ९८ ॥ सहस्रादित्यदुर्द्धर्षः सहस्रवक्त्रवा
न्हरिः ॥ सहस्रायुधसंपन्नः शार्ङ्गधन्वा गदाधरः ॥ ९९ ॥ दुर्गमस्तु दुराराध्यो दुर्जयो दु
रतिक्रम ॥ निर्गुणात्मा गुणातीतो गुणाधीशः स्वयं स्वराट् ॥ १०० ॥ परंज्योतिरतीते
यो विष्णुराद्यः पुरातनः ॥ रूपापांगविमोक्षेण कोटिब्रह्मांडकारकः ॥ १ ॥ एतत्तु श्रुत्वा
महाविष्णुरुवाच च महेश्वरं ॥ शनैः शनैः समुत्थाय दंडवत्प्रणिनोनुवि ॥ २ ॥ नमस्ते वि
श्वनाथाय नमस्ते खिलनाविने ॥ नमस्तेस्तु महाशंभो नमस्ते विश्वरूपिणे ॥ ३ ॥ ब्रह्म

सदा० लिंगस्वरूपायमायालिंगकुटंबिने॥लीलामात्राखिलाधारतनवेविश्वरूपिणे॥४॥
१९ आनंदकंदमूलायसंनाविन्नात्मनेनमः॥व्यक्तायाव्यक्तरूपायकार्यकारणसंसदि॥५॥
प्रसीदत्वंभगवन्देवकृपांकुरुमहेश्वरः॥आज्ञांलब्ध्वाकरिष्यामिब्रह्मांडानांशनानवै
६॥महाशंभुरुवाच॥आत्मतुल्यबलैश्वर्ययुक्तआत्मानमात्मना॥विनज्यशक्तधा
पुत्रकुरुकार्ययथोचितं॥७॥ध्येयंमूर्तेजगद्धातुरामस्याद्भुतकर्मणः॥सात्तांघ्रिक
मलंमूर्द्धिध्यानंत्वंकर्तुमर्हसि॥८॥सौमित्रिरुवच॥श्रुत्वोत्तद्वचनंघोरंमहावि
ष्णुरचिंतयत॥आत्मैश्वर्यप्रकाशेनकालेनविकृतात्मना॥९॥मायाबलानुरोधेन १९

त्तानेनशक्तेजसा॥असृजत्सहस्रावेदाविष्णुन्कतिपयान्बहून्॥१०॥सेश्वरान्गुण
संपन्नान्देवानीकविवर्द्धितान्॥विचित्रगुणभेदेनआचिरेणरसात्मना॥११॥चि
रंबहुप्रयासेनकुंटिशक्तिरचेतनान्॥तांस्तथासंविलोक्यार्थहरिर्नारायणःस्वराट्
॥१२॥विसृजत्रिविधंतेजोलीलायाविश्वरूपिणः॥अंशांस्तेषुमहाविष्णुःकृपयादत्तवां
स्ततः॥१३॥चैतन्यघनविस्तृत्रिर्विविधान्सूर्यसंज्ञकान्॥तेषांनानास्त्वयोदेवाब्रह्मावि
ष्णुमहेश्वराः॥१४॥प्रकृतिबोधकाःसर्वेचैतन्यघनविग्रहाः॥सर्वैश्वर्यगुणाधीशाःप्रभ
वोविश्वकर्मणि॥१५॥रजसावर्द्धतेब्रह्मासोमस्तस्यकलोद्भवः॥सत्वेनैवसदाविष्णु

सदा० वैन्हौदेवःप्रतिष्ठितः॥ २६॥ तमसाचमहारुद्रःसर्वसंहारकारकः॥ एकएवत्रिधाभिन्नःस
२० ष्टिस्थितिलयात्मकः॥ २७॥ तेषुविष्णुर्महातेजाब्रह्मकोशेनुजंतवः॥ प्रतिष्टःसहस्रा
देवाउदतिष्टन्जलात्ततः॥ २८॥ चेष्टमानास्ततोलोकागुणकर्मविवर्द्धिताः॥ इंद्रशाः
प्रथिताव्यग्राश्चायंतिप्रलयंतिच॥ २९॥ उन्निमेषनिमेषाभ्यांमहाविक्षोरचेतना॥ कालः
कटाक्षमात्रेणखंडितास्थापितामुहुः॥ २०॥ सूतउवाच॥ प्रवृत्तिश्चश्रुतादेवलोकाना
वद्नान्नव॥ स्वभावमनुवर्त्ततेननिवृत्तिफलान्वितः॥ २१॥ सोमित्रिउवाच॥ सृष्ट्वाथवि
विधंवेदाब्रह्मांडंतत्ववंहितं॥ सहस्रवैमहात्मत्वेःकृत्वाकामममनोरथं॥ २२॥ जगामवि २०

मलंधाममहाशांभवमैश्वरं॥ तंदृष्ट्वाविमलंज्ञानंसर्वदेवेश्वरेश्वरं॥ २३॥ परंज्यो
तिःपरंस्थानंपरकाशंपरात्परं॥ पंचवक्त्रंमहालिंगंमायासक्तमकल्मषं॥ २४॥
इंदुकोटिप्रतिकाशंसूर्यानलसमेक्षणं॥ स्वज्ञानध्वस्ततिमिरंमायागुणविडंबनं
॥ २५॥ प्रणम्यचमहादेवमुवाचपरमेश्वरं॥ कृतांजलिपुटोभूत्वासानंदगद्गदाकुलः
॥ २६॥ कृतंसर्वंमहाशंभोसेश्वरंसाधिदेवतं॥ अहंतत्रप्रविष्टश्चगुणकर्मवित्ताग
वित्॥ २७॥ इमेदेवामदंशेनचैतन्यघनविग्रहाः॥ नातईश्वरभावश्चब्रह्मविष्णु
महेश्वराः॥ २८॥ तेजस्त्रयंमयासृष्टंकालकर्मविभावनैः॥ नियुक्तास्तेषुकुर्वंतिभावा

भावयन्नुत्तमौ ॥ २९ ॥ प्रवृत्तिश्च कृतानानातल्लोकानांनिनतरो मया ॥ निवृत्तिंकथमन्वे

मि जन्मसंसारबंधनात् ॥ ३० ॥ महाशंभुरुवाच ॥ शृणुवत्सप्रवक्ष्यामिलोकानांहितमु
त्तमं ॥ श्रवणात्कीर्त्तनात्प्राणान्तःपदंयातिनिरामयं ॥ ३१ ॥ रामाङ्घ्रिकमलध्यानात्
पूर्णानंदरसाप्लुतः ॥ आत्मारामश्चिदानंदोस्महेषत्तुरलंपटः ॥ ३२ ॥ इयंमहेश्वरीदे
वियोगेशायोगमुद्रिका ॥ विनारामप्रशादेनक्षणमेकंनतिष्टति ॥ ३३ ॥ कथयिष्यंति
तेस्वंहरस्यंनक्तिवर्द्धनं ॥ कामाहिनष्टचित्तानांजनानांपथ्यमुत्तमं ॥ ३४ ॥ महाविष्णु
उवाच ॥ त्वंमातर्जगतांधात्रीशांनवीकरुणात्मिका ॥ महाशक्तिर्मही विद्यामहामेधास

रस्वती ॥ ३५ ॥ महामोहाचमोहश्चघोररूपाविसारदा ॥ चिन्मयीसात्विकीविद्याराजसी
तामसीपरा ॥ ३६ ॥ कथयस्वमहामायेसीतापतीरनुत्तमं ॥ रहस्यंसूत्रसंबंधनिबंधंवि
दुषामपि ॥ ३७ ॥ केनोत्पन्नंकुतोवापिलब्धंकेनप्रवर्त्तितं ॥ मंत्ररूपंसदाध्येयंकियदस्य
रसंमितं ॥ ३८ ॥ निरुक्तिलक्षणंवेदाःप्रमाणंवेदसंमितं ॥ सर्वबीजमयंसूत्रमाद्यंरामा
क्षरंमहत् ॥ ३९ ॥ महामायोवाच ॥ कदाचित्सूयतेविश्वंयेनवाजायतेत्वनायात् ॥ इतिसू
त्रपदंप्रोक्तंब्रह्मलिंगनिदर्शनं ॥ ४० ॥ सूत्रमूलमिदंविश्वंसूत्रेसर्वंप्रतिष्टितं ॥ सूत्रेण
जायतेविश्वंविनासूत्रंविलीयते ॥ ४१ ॥ प्रणम्यादौमहादेवंदेवदेवरघूद्वहं ॥ जानकी

सदा०
२२

वक्तुंनेक्षोनंदिनजंखरवैरिणां ॥ ४२ ॥ रामांघ्रिध्यानसौभाग्यात्सीतापदनिषेवणात्
किंचिज्ज्ञानामिदेवेशंस्तत्रंभक्तिप्रवर्त्तनं ॥ ४३ ॥ महाविष्णुसहस्राणांमहाशंभुशतस्य
च ॥ सृष्टिस्थितिस्तत्वानांचकर्त्तासौरघुनंदनः ॥ ४४ ॥ सीतानित्यापरासूक्ष्मासैषदाशर
थिःप्रभुः ॥ रामाच्चकःपरःसत्योनान्यत्सत्यंकदाचन ॥ ४५ ॥ शपथंकरोमितेवत्सपाद
योनस्तुनप्रनो ॥ रामादन्यंतसंवेद्मिपरिदेवंसदीश्वरं ॥ ४६ ॥ अद्वैतेषपरंब्योम्निधा
मनिप्रभुरीश्वरः ॥ सीताप्रेमरसामोदविनोदरितिविभ्रमः ॥ ४७ ॥ कथयामासपुत्रा
यसदाशिवायराघवः ॥ मंत्रंषडक्षरंतारंमंत्रिणांकल्पवृक्षकं ॥ ४८ ॥ रामचंद्रान्महा २२

शंभुर्लेभेचवान्मंत्रमुत्तमं ॥ सुप्रकामंसदाबोधंरजिनार्गवातारकं ॥ ४९ ॥ पुरुषार्थप्रदं
शाश्वत्ब्रह्महत्याकोटिविनाशनं ॥ ज्ञानादीपकलारूढंसर्वविद्याफलप्रदं ॥ ५० ॥ सर्वेषां
मंत्रवीर्याणांश्रेष्ठावैष्णवउच्यते ॥ तेषुवैष्णवमंत्रेषुराममंत्रःफलाधिकः ॥ ५१ ॥ गाण
पत्यादिसौरेषुशिवशक्तिजपेषुच ॥ मंत्रराजइतिख्यातःकोटिकोटिगुणाधिकः ॥ ५२ ॥
राज्यंदद्यात्स्त्रियंदद्यात्पुत्रंदद्याधनादिकं ॥ मस्तकंतुस्वकंदद्यान्नचदद्यात्षड
क्षरं ॥ ५३ ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ एकतःसर्वतीर्थानिदानव्रततपांसि
च ॥ ५४ ॥ एतानिमंत्रराजस्यकलांनार्हंतिषोडशीं ॥ गुरुदेवप्रसादेनहृदिगम्यंषडक्षरं

सदा० ॥५५॥ एषधर्मपरोनित्य एषदानपरः शुचिः॥ एषज्ञानपरः सूक्ष्म एषयोगपरोर्थदः॥५६॥
२३ एषव्रतपरः सिद्धिऋद्धिश्च सर्वसंपदां॥ एषतपःपरः श्रेष्ठ एषयज्ञऽपरोहविः॥५७॥
धर्माणांधर्मनिचयः पुण्यानांपुण्यसंचय॥ व्रतानांव्रतराजोसौदेवानांप्रवरोगुरुः॥५८॥
इतिमंत्रः सविज्ञेयस्तारकं इतिसंस्थितः॥ कल्पवृक्षइतिस्फीतंसाधकानांफलप्रदः॥५९॥
महाविष्णुरुवाच॥ सत्तुमातस्त्वयाज्ञेयोमंत्रराजः षडक्षरं॥ विनागुरुप्रसादेनकथंसिद्धि
र्भविष्यसि॥६०॥ एवंचशिरसातातप्रसादायमहाशिवं॥ यत्प्रसादान्मनुंलब्धामोदथाः
महशक्तिनीः॥६१ महाशंभुरुवाच॥ देवदेवजगधातर्लोकानामभयप्रद॥ प्रसादंकुरु २३

देवेशदेहिमंत्रंषडक्षरं॥६२॥ सौमित्रिरुवाच॥ एतत्श्रुत्वामहाशंभुः प्रणम्यादौरघूद्वहं
सर्वैश्वर्यप्रदेमंत्रंदत्तवान्विश्वहेतवे॥६३॥ तस्यविज्ञानमात्रेणमंत्रस्यजगदीश्वरः
सर्वैश्वर्यप्रदात्रूढोमहाविष्णुःस्वयंस्वराट्॥६४॥ इत्युक्त्वासोमहाशंभुर्भगवान्प्रभुर
व्ययः॥ विससर्जमहाविष्णुःपुत्रमाघ्रायमस्तके॥६५॥ सूतउवाच॥ एषाश्रुतामहावा
हास्तूत्रसंबंधिनीकथा॥ केनप्रवर्त्तितंलोकेलब्धंकेनमहात्मना॥६६॥ एतत्सर्वंकृपाप्
र्वंकथयस्वयथातथं॥ त्वंदेवजगतांनाथकार्यकारणतत्त्ववित्॥६७॥ सौमित्रिरुवाच
लब्धाद्भुयततादेवान्ब्रह्मविष्णुमहेश्वरान्॥ कथयामासदेवेशोमूलमंत्रंषडक्षरं॥६८

सद्रा० एकमासीत्तथापूर्वं सूत्रं कमलसंभवं ॥ त्रिप्रपंचं पदाख्यातं देव त्रिविधं कृतं ॥ ६९ ॥ प्रा
२६ कृतं ब्रह्मसूत्रं च महाशंभवमेश्वर ॥ गुप्तं च कुरुष्व त्वं देवा ज्ञात्वा ब्रह्मनिदर्शनं ॥ ७० ॥ गुप्त
त्वेतं तदा चासि दिव्यं युगसहस्रकं ॥ किंमपि कालभावाच्च जीवलोकानुकंपया ॥ ७१ ॥
देव्यानुबोधितः श्रीमान् विष्णुः सर्वजनेश्वरं ॥ ग्राहयामास तां देवी तारकं ब्रह्मवाचकं
॥ ७२ ॥ कृतकृत्या तदा लक्ष्मीर्लब्ध्वा मंत्रं षडक्षरं ॥ ददौ प्रीत्या ततो देवी विष्वक्सेनाय
तारकं ॥ ७३ ॥ विष्वक्सेनस्ततो मंत्रं लब्धवान् वैष्णवोत्तमं ॥ गोपदेव इति ख्यातो मुनिव
र्यः सदात्मवान् ॥ ७४ ॥ विकटाद्दौ पुरा वेदाद्धापरादौ परांकुशः ॥ गोपदेवं समाराध्य लेभे २६

ध्यंति षडक्षरं ॥ ७५ ॥ चत्वारस्तस्य विख्याताः शिष्याः परांकुशस्य च ॥ भविष्यंति कलेरग्रे
ब्राह्मणा वेदपारगाः ॥ ७६ ॥ श्रुतिवेदः श्रुतप्रज्ञः श्रुतधामा श्रुतोदधिः ॥ त्रिदंडिनः शिष्या
युक्ता रामानुजश्च पंचमा ॥ ७७ ॥ मत्समीपे महापीगे विकटे रंगमंडपे ॥ जपिष्यंति चिरं
मंत्रं तारकं तिमिरापहं ॥ ७८ ॥ श्रीवैष्णवपदं प्रोक्तं राघवास्य रचितनात् ॥ भवबंधवि
नाशाय लोकानां हितकाम्यया ॥ ७९ ॥ इदं सूत्रं महानागा महाशंभवमीरितं ॥ संचरि
ष्यंति कालेन रामानुजमुखाश्रयं ॥ ८० ॥ इदं दिव्यमिदं रम्यमिदं भाव्यमिदं शुचिः ॥ गुह्या
द्गुह्यतमं सौम्यं गुह्यानां गुह्यमुत्तमं ॥ ८१ ॥ पवित्राणां पवित्रं च त्तमं मंगलानां च मंगलं ॥ श्री

सदा० अयं सर्वदेवानां योगीनां सिद्धिदायकं ॥ ८२ ॥ स्त्रीणामाकर्षणं दिव्यं मारणं दुष्टचेतसां
२५ स्तंभनं परसैन्यानां वशीकरणमायुधं ॥ ८३ ॥ उच्चाटनं च पापानां दीपनं जडचेतसां
पठनाच्छ्रवणाद्ध्यानान्मुक्तिरेव न संशयः ॥ ८४ ॥ तस्मात्सर्वप्रयत्नेन पठितव्यं समा
हितैः ॥ २८५ ॥ इति श्रीलक्ष्मणानिकेतायां सदाशिवसंहितायां परमहंसरामानुज
वेदसंवादेनवांशके नवोत्तलिनीमनवमोध्याय समाप्तः ॥ श्रीकृष्णायनमः श्रीराम

812